AIJRELPLS VOLUME 9, ISSUE 4 (2024, JUL/AUG) (ISSN-2456-3897)ONLINE
Anveshana's International Journal Of Research In Education, Literature, Psychology And Library Sciences

# व्यक्तिविवेकमेकं विहङ्गावलोकनम्

**डॉ. अमरेन्द्रकुमारमिश्रः**
**सहाचार्य:, साहित्यविभागः**

ध्वनिविरोधी आचिर्येषु अग्रगण्यः काश्मीरप्रदेशस्य गौरवर्द्धकः न्यायाचार्य राजानकमहिमभट्टः । असौ अनुमानेन अन्तर्भावं प्रकाशयितुं व्यक्तिविवेकं प्रणीतवान् । तत्र चाह व्यक्तिविवेककारः मङ्गलश्लोके -

'अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम् ।

व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम् ।।१'

एतत् कार्य सम्पादयितुमाचार्यो महिमभट्टः सर्वप्रथममानन्दवर्धनाचार्यकृतं लक्षणमुपन्यस्यति -

'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।

व्यङ्क्तः काव्यविशेषः सः ध्वनिरिति सूरिभिः कथितः ॥२'

महिमभट्टस्य मान्यता वर्तते यदिदं ध्वनेर्लक्षणं कृतं तत्तु यस्यानुमानस्याहं विवेचनं करोमि तत्रैव सङ्गच्छते । तथा चाह सः-

'एतच्च विविच्यमानमनुमानस्यैव सङ्गच्छते नान्यस्य' इति । सर्वप्रथमं महिमभट्टो ध्वनेर्लक्षणे दोषं प्रदर्शयन् वक्ति 'अर्थस्य तावदुपसर्जनीकृतत्वमनुपादेयमेव' । इति । यतः विशेषणवाचकस्य | शब्दस्य प्रयोगस्तु तत्रैवोचितो भवति यत्र भवति तदविना विशेषणीभूतस्यार्थस्य ज्ञाताभावः ।

ध्वनिकारो ध्वनिलक्षणे प्राह 'यत्रार्थः शब्दो वा' अस्मिन् लक्षणांशे शब्दस्यानुपादेयतां प्रकाशयन् प्राह यत् शब्दः स्वार्थप्रकाशनव्यतिरिक्तं कार्यं नहि कुरुते । काव्ये शब्दः प्रतीयमानायोपयोगी नहि भवति, अत एव ध्वनिलक्षणे तस्योपादानमनावश्यकमेव, शब्दस्तु अनुकार्यों भवति । तस्य द्वौ भेदौ भवतः सार्थकः शब्दः निरर्थकः शब्दश्च । अनुकरणात् तस्यार्थवोधो नहि जायते । अत एव तस्यानुकरणव्यतिरिक्तेणोपसर्जनीकृतार्थत्वं नहि सम्भवति । अनुकरणव्यतिरिक्तस्यानुकार्यस्य शब्दस्य उपसर्जनीभावाद् व्यभिचार एव तस्य तदर्थमुपादानात् । अत एव व्यभिचारासम्भवयोरपि यत् शब्दस्योपसर्जनीकृतात्मत्वं तत्तु पुनरुक्तदोषमावहति लक्षणे ।

ध्वनेर्लक्षणेऽधिकत्वं दोषमुपन्यस्य न्यूनत्वदोषमुपदर्शयितुमाह- येन प्रकारेण ध्वनिलक्षणे अभिधेयस्या तस्य विशेषणस्योपादानं कृतं तेनैव प्रकारेण लक्षणे अभिधाया अप्युपादनं कर्तव्यमासीत्. अन्यथा यत्र दीपकादेरलङ्कारादुपमादेः प्रतीतिर्भवति तत्र ध्वनित्वमिष्टं न स्यात् । अनेन प्रकारेण महिमभट्टेन ध्वनिकारकृते ध्वनिलक्षणे दोषद्वयमुपन्यस्तम् ।

महिमभट्टानुसारेण शब्दभेदनिरूपणम्

प्रथमस्य विमर्शस्य प्रधानप्रतिपाद्यविषयो वर्तते व्यञ्जनाया खण्डनम् । तस्याः खण्डनाय महिमभट्टः सर्वप्रथमं शब्दानां भेदान् निरूपयति यत् 'सर्व एव हि शब्दव्यवहारः साध्यसाधनभावगर्भतया प्रायेणानुमानरूपेणाभ्युपगन्तव्यः तस्य परप्रवृत्तिनिवृत्तिनिवन्धनत्वात् तयोश्च सम्प्रत्ययासम्प्रत्ययात्मनोरन्यथाकर्तुमशक्यत्वात् । नहि युक्तिमनवगच्छन् कश्चिद् विपश्चिद् वचनमात्रात् सम्प्रत्ययभाग्भवति । द्विविधो हि शब्दः पदवाक्यभेदात् । तत्र पदमनेकप्रकारं-नामाख्यातोपसर्गनिपातकर्मप्रवचनीयभेदात् ।'

पुनः व्यक्तिविवेककारेणाभिहितं यत्- 'नामान्यपि वहु प्रकारकाणि भवन्ति जातिगुणद्रव्यक्रियाणां भेदात्' ।

अत्र व्यक्तिविवेककारेणैकं नवीनमेव मतं समुपस्थापितम् । प्रवृत्तिनिमित्तविषये महाभाष्यकारादिकानां मतमस्ति यत् जातिगुणक्रियाद्रव्यादयो शब्दप्रवृत्तेर्निमित्तं भवति । महिमभट्टो वक्त यत् एका क्रियैवैषा प्रवृत्तिनिमित्तमस्तीति । तथाहि -

'क्रियैवैका एषां प्रवृत्तिनिमित्तमिति क्रियाशब्दत्वमेव सर्वेषां नामपदानामुपगच्छन्ति । तथाहि-घटादिशब्दः स्वार्थे प्रवर्त्तमांना घटनादिक्रियामेवान्वयव्यतिरकाभ्यां प्रवृत्तिनिमित्तभावनावलम्बमाना दृश्यन्ते न घटत्वादि सामान्यमिति ।

अनेनैव प्रकारेण सः गुण-क्रियाद्रव्यादिशब्दानामपि क्रियाया एव प्रवृत्तिनिमित्तत्वं प्रादर्शिषत् । क्रियाया एव सर्वत्र प्रवृत्तिनिमित्तत्वं प्रतिपाद्य, तस्यास्वीकारे तत्र जायमानान् दोषानपि उद्धृतं चकार महिमभट्टः । तथाहि-

'घटतीति घटो ज्ञेयो नाघटन् घटनामियात् ।

अघटत्वाविशेषेण पटोपि स्याद् घटोऽन्यथा' ।। ३ इति ।

घटनक्रिया चेयं तद्रूपतापत्तिस्वरूपा वर्तते । तस्य कारणञ्च तस्य ऐश्वरं निर्माणं वर्तते येन चित्रार्थानामाभासो भवति । अत्र महिमभट्टः प्राह यत् व्युत्पत्तिनिमित्तप्रवृत्तिनिमित्तयोर्भेदो वर्तते । व्युत्पत्तिनिमित्तमन्यद् भवति शब्दस्य प्रवृत्तिनिमित्तं चान्यद् । शब्दानां व्युत्पत्तौ अन्योऽप्यर्थः कारणं भवितुमर्हति किन्तु तस्य प्रवृत्तिनिमित्तं तु क्रियैवैका भवति । तथा चाह सः

'घटनञ्च तदात्मत्वापत्तिरूपा क्रिया मता ।

मूलञ्च तस्याश्चित्रार्थाभावाविष्कृतिरीशितुः ।।

यः कश्चिदर्थशब्दानां व्युत्पतौ स्यानिवन्धनम् ।

प्रवृत्तौ तु क्रियैवैका सत्तासादनलक्षणा ।। ४ इति ।

शब्दभेदान् लक्षयन् महिमभट्टः प्राह 'सत्त्वप्रधानानि नामानि भवन्ति । भावप्रधानमाख्यातम् । असत्त्वभूतार्था उपसर्गादयः । भावसत्त्वयोः आत्मभेदप्रत्यायननिमित्तमवधृतरूपार्थविशेषाः स्वरादयो निपाताः । क्रियाविशेषोपजनितसम्बन्धवच्छदहेतवः कर्मप्रवचनीयाः' इति । शब्दानां भेदविषये मतान्तरस्य चर्चां कुर्वन् महिमभट्टः प्राह -

'द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा ।

अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्' ।। ५ इति ।

महिमभट्टानुसारेण अर्थनिरूपणम् व्यक्तिविवेककारो महिमभट्टो द्विप्रकारकमर्थं स्वीकरोति वाच्यरूपमनुमेयरूपञ्च । सः व्यङ्ग्यरूपमर्थमेव नहि स्वीकरोति । अस्मिन्नर्थे प्राह सः

'श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते ।

तं मुख्यमर्थं मन्यन्ते गौणं यत्नोपपादितम्' ।। ६ इति ।

अनुमेयश्चार्थः सो भवति यस्यार्थस्य प्रतीतो वाच्यार्थः, अन्यार्थो वा हेतुर्भवति । सोऽयमनुमेयार्थः त्रिप्रकारको भवति वस्तुस्वरूपः, रसादिस्वरूपः अलङ्कारस्वरूपश्च । तत्र वस्त्वलङ्काररूपावर्थौ वाच्यौ भवितुमर्हतः किन्तु रसादिरूपस्त्वर्थ अनुमेय एव भवति ।

किञ्च महिममट्टानुसारेण शब्दप्रतीतार्थोऽपि द्विप्रकारको भवति पदार्थो वाक्यार्थश्च । तत्र पदार्थस्तु वाच्य एव भवति नानुमेयः, निरंशत्वात् ।

संशयत्वकल्पनायुक्तस्य वाक्यार्थस्य द्वौ अंशौ भवतः उद्देश्यरूपः विधेयरूपश्च । तत्र विधेयांशो द्विप्रकारको भवति सिद्धः साध्यश्च । सिद्धार्थः उपपादननिरपेक्षो भवति, साध्यार्थश्चोपपादनसापेक्षः ।

सोऽयमसिद्धार्थः साध्यसाधनात्मको भवति । साध्यसाधनस्यास्य निश्चयश्चानयोरर्थयोऽविनाभावकृतो भवति । अविनाभावनिश्चयश्च प्रमाणेन द्वारा जायते । तच्च प्रमाणं त्रिविधं जायते लोको वेदः अध्यात्मं च । तथा चोक्तमभियुक्तैः

'लोको वेदः तथाध्यात्मं प्रमाणं त्रिविधं स्मृतमिति ॥७

लोकप्रमाणस्य विषयो लोकप्रसिद्धो भवति । यथा -

'चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् । उमामुखं तु प्रतिपद्यलोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ' ।। ८इति । शास्त्रमात्रप्रसिद्धार्थविषयो वेदः । वेदग्रहणमितिहासपुराणधर्मशास्त्राद्युपलक्षणम्, तेषां तन्मूलत्वोपगमात् । यथा -

'अयाचितारं नहि देवमद्रिः सुतां प्रति ग्राहयितुं शशाक ।

अभ्यर्थनाभङ्गभयेन साधुः माध्यस्थ्यमिष्टेऽप्यवलम्यतेऽर्थे ||९

अत्र हि कारणभूतस्य भगवद्गतस्य सम्प्रदानत्वनिबन्धनत्वस्य याचनस्याभावे भूधरेन्द्रगतस्य कार्यस्य कन्याग्रहणशक्तत्वस्याभावोपनिबन्धः शास्त्रमूलः तयोः कार्यकारणभावस्य तन्मूलत्वेन प्रसिद्धेः । अध्यात्मं च प्रमाणमाध्यात्मिकार्थविषयं भवति । १० यथा-

'पशुपतिरपि तान्यहानि कृच्छ्रादगमद्रिसुतासमागमोत्कः ।

कमपरमवशं न विप्रकुर्युः विभुमपि तं यदमी स्पृशन्ति भावाः ।।११

साध्यसाधनभावश्च द्विप्रकारको भवति शाब्दश्चार्थश्चेति । न्यायानुगामी महिमभट्टः प्रतीयमानार्थं प्रति वाच्यार्थस्य हेतुत्वं स्वीचकार, किञ्च वाच्यप्रतीयमानयोरर्थयोः व्यङ्ग्यव्यञ्जकभावममत्वा गम्यगमकभावं स्वीचकार ।

महिमभट्टस्याभिप्रायो वर्तते यदनुमानमेकं प्रमाणं वर्तते, तस्मिन् च अव्यभिचरित एव हेतुस्मद्हेतुर्भवति । वाच्यार्थस्य प्रतीयमानेन साकमपि नाभावसम्बन्धो नहि भवति । तात्पर्यार्थवादिनां विरोधे महिमभट्टः प्राह यत् शब्दतः कथित एव अर्थः तात्पर्यार्थ इत्यभिधीयते ।

पादटिप्पणी

१) व्यक्तिविवेकः - १/१ ३) व्यक्तिविवेकः - १/८ ६) व्यक्तिविवेकः पृ-३३ ९) व्यक्तिविवेकः पृ ३९

४) व्यक्तिविवेकः - १/९-१० ५) व्यक्तिविवेकः पृ-३२ ८) व्यक्तिविवेकः पृ-३७

७) व्यक्तिविवेकः पृ-३७ १०) व्यक्तिविवेकः पृ-३९ ११) व्यक्तिविवेकः पृ- ३९

**सहायकग्रन्थसूची**

१) व्यक्तिविवेक चौखम्बासुरभारतीप्रकाशनम्, वाराणसी

२) व्यक्तिविवेकविमर्शः- रामकुमारशर्मा, जयपुरपरिसरः, जयपुरम्

३) ध्वन्यालोकः चौखम्बाविद्याभवनम् वाराणसी

४ ) ध्वन्यालोकः चौखम्बासुरभारतीप्रकाशनम्, वाराणसी

५) अलङ्कारशाखेतिहासः चौखम्बासुरभारतीप्रकाशनम्, वाराणसी

**कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालयः**

**हेरिया, पूर्वमेदिनीपुरम्, पश्चिमवङ्गः ।**